## संस्कृतबालादर्शे अष्टमः पाठः ८

| | | |
|---|---|---|
| शाखा। | पर्णम्। | |
| तरुः। | पर्वतः। | बीजम्। |
| मधु। | नगरम्। | अङ्कुरः। |
| पीठम्। | समुद्रः। | मक्षिकाः। |
| रत्नम्। | ग्रामः। | धनिकः। |

शाखायाः पर्णानि पतन्ति। मक्षिकाः पुष्पेभ्यः मधु पिबन्ति। बीजात् अङ्कुरः प्ररोहति। पात्रात् जलं स्रवति। धेनुः व्याघ्रात् त्रस्यति। अहं पीठात् उत्तिष्ठामि। त्वं तरोः अवरोहसि पर्वतात् नदी प्रवहति। धनिकाः ग्रामात् नगरं गच्छन्ति। जनाः समुद्रात् रत्नानि आनयन्ति।

**प्रश्नाः।**

१। कस्याः पर्णानि पतन्ति ? शाखायाः पर्णानि पतन्ति।

२। मक्षिकाः केभ्यः मधु पिबन्ति ? मक्षिकाः पुष्पेभ्यः मधु पिबन्ति।

३। कस्मात् अङ्कुरः प्ररोहति ? बीजात् अङ्कुरः प्ररोहति।

४। कस्मात् जलं स्रवति ? पात्रात् जलं स्रवति।

५। धेनुः कस्मात् त्रसयति ? धेनुः व्याघ्रात् त्रस्यति।

६। त्वं कस्मात् उत्तिष्ठसि ? अहं पीठात् उत्तिष्ठामि।

७। अहं कस्मात् अवरोहामि ? त्वं तरोः अवरोहसि।

८। नदी कस्मत् छ्वहति ? नदी पर्वतात् प्रवहति।

९॥ धनिकाः कस्मात् कुत्र गच्छन्ति ? धनिकाः ग्रामात् नगरं गच्छन्ति।

१०। जनाः कस्मात् कानि आनयन्ति ? जनाः समुद्रात् रत्नानि आनयन्ति।

**ख) पञ्चम्यन्तैः पदैः वाक्यानि पूरयत।**

१। मक्षिकाः **कमलेभ्यः** (कमल) मधु पिबन्ति।

**२। तटाकात्** (तटाक) नार्यः आरोहन्ति।

**३। लतायाः** (लता) पुष्पाणि पतन्ति।

**ग) लट् रूपैः वाक्यानि पूरयत।**

१। शकटं ग्रामात् ___ (आगच्छ्)। शकटं ग्रामात् आ**गच्छति**।

२। अहं दूरात् गजं ___ (पश्य्)। अहं दूरात् गजं **पश्यामि**।

३। वयं मक्षिकाभ्यः ___ (त्रस्)। वयं मक्षिकाभ्यः **त्रस्यामः**।

४। यूयं वृक्षात् ___ (अवरोह्)। यूयं वृक्षात् **अवरोहथ**।

**घ)** अर्थभेदं वदत (Give difference in meaning)

१। तरति = crosses, swims, वितरति = gives.

२। आरोहति = ascends, अवरोहति = descends, प्ररोहति = grows, sprouts.

## शब्दसंग्रहः = Vocabulary.

तरुः = *m* tree, शाखा = *f* branch, मधु = *n* honey, पीठम् = *n* seat, बीजम् = *n* seed, अङ्कुरः = *m* sprout, मक्षिका = *f* fly, जनाः = *m* people, रत्नम् *n* gem, रत्नानि = *n* gems, प्ररोहति = *P* grows, पबन्ति = *P* thry drink, स्रवति = *P* flows, उत्तिष्ठामि = *P* I get up, त्रस्यति = *P* fears, अवरोहसि = *P* you descend, you dismount, तटाकम् = *n* tank.